# श्रीमद् भागवत रसिक कुटुंब

## देवीस्तोत्रं विष्णुनाकृतम्

श्रीभगवानुवाच

नमो देव्यै प्रकृत्यै च, विधात्र्यै सततं(न्) नमः।
कल्याणै कामदायै च, वृद्ध्यै सिद्ध्यै नमो नमः ॥ 1॥

सच्चिदानन्दरूपिण्यै, संसारारणये नमः।
पञ्चकृत्यविधात्र्यै ते, भुवनेश्यै नमो नमः ॥ 2॥

सर्वाधिष्ठानरूपायै, कूटस्थायै नमो नमः।
अर्धमात्रार्थभूतायै, हृल्लेखायै नमो नमः ॥ 3॥

ज्ञातं मयाऽखिलमिदं(न्) त्वयि सन्निविष्टं(न्),
त्वत्तोऽस्य सम्भवलयावपि मातरद्य।
शक्तिश्च तेऽस्य करणे विततप्रभावा ,
ज्ञाताऽधुना सकललोकमयीति नूनम् ॥ 4॥

विस्तार्य सर्वमखिलं(म्)  सदसद्विकारं(म्),

सन्दर्शयस्यविकलं पुरुषाय काले।
तत्त्वैश्च षोडशभिरेव च सप्तभिश्च,
भासीन्द्रजालमिव नः(ख्) किल रञ्जनाय ॥ 5॥

न त्वामृते किमपि वस्तुगतं विभाति ,
व्याप्यैव सर्वमखिलं(न्) त्वमवस्थिताऽसि।
शक्तिं(म्) विना व्यवहृतो पुरुषोऽप्यशक्तो,
बम्भण्यते जननि बुद्धिमता जनेन ॥ 6॥

प्रीणासि विश्वमखिलं सततं प्रभावैः(स्),
स्वैस्तेजसा च सकलं प्रकटीकरोषि।
अस्त्येव देवि तरसा किल कल्पकाले ,
को वेद देवि चरितं(न्) तव वै भवस्य ॥ 7॥

त्राता वयं(ञ्) जननि ते मधुकैटभाभ्यां,
लोकाश्च ते सुवितताः(ख्) खलु दर्शिता वै।
नीताः(स्) सुखस्य भवने परमां(ञ्) च कोटिं,
यद्दर्शनं(न्) तव भवानि महाप्रभावम् ॥ 8॥

नाहं भवो न च विरिञ्चि विवेद मातः(ख्),
कोऽन्यो हि वेत्ति चरितं(न्) तव दुर्विभाव्यम्।
कानीह सन्ति भुवनानि महाप्रभावे,
ह्यस्मिन्भवानि रचिते रचनाकलापे ॥ 9॥

अस्माभिरत्र भुवने हरिरन्य एव,
दृष्टः(श्) शिवः(ख्) कमलजः(फ्) प्रथितप्रभावः।
अन्येषु देवि भुवनेषु न सन्ति किं(न्) ते ,
किं विद्म देवि विततं(न्) तव सुप्रभावम् ॥ 10॥

याचेऽम्ब तेऽङ्घ्रिकमलं प्रणिपत्य कामं(ञ्),
चित्ते सदा वसतु रूपमिदं(न्) तवैतत्।
नामापि वक्त्रकुहरे सततं(न्) तवैव ,
सन्दर्शनं(न्) तव पदाम्बुजयोः(स्) सदैव ॥ 11॥

भृत्योऽयमस्ति सततं मयि भावनीयं(न्),
त्वां स्वामिनीति मनसा ननु चिन्तयामि।
एषाऽऽवयोरविरता किल देवि भूयाद्-
व्याप्तिः(स्) सदैव जननी सुतयोरिवार्ये ॥12॥

त्वं वेत्सि सर्वमखिलं भुवनप्रपञ्चं ,
सर्वज्ञता परिसमाप्तिनितान्तभूमिः।
किं पामरेण जगदम्ब निवेदनीयं,
यद्युक्तमाचर भवानि तवेङ्गितं स्यात् ॥ 13॥

ब्रह्मा सृजत्यवति विष्णुरुमापतिश्च,
संहारकारक इयं(न्) तु जने प्रसिद्धिः ।
किं सत्यमेतदपि देवि तवेच्छया वै ,
कर्तुं(ङ्) क्षमा वयमजे तव शक्तियुक्ताः ॥ 14॥

धात्री धराधरसुते न जगद्विभर्ति,
आधारशक्तिरखिलं(न्) तव वै बिभर्ति ।
सूर्योऽपि भाति वरदे प्रभया युतस्ते ,
त्वं सर्वमेतदखिलं विरजा विभासि ॥ 15॥

ब्रह्माऽहमीश्वरवरः(ख्) किल ते प्रभावात्-
सर्वे वयं(ञ्) जनियुता न यदा तु नित्याः ।
केऽन्ये सुराः(श्) शतमखप्रमुखाश्च नित्या,
नित्या त्वमेव जननी प्रकृतिः(फ्) पुराणा ॥ 16॥

त्वं(ञ्) चेद्भवानि दयसे पुरुषं पुराणं(ञ्),
जानेऽहमद्य तव संनिधिगः(स्) सदैव ।
नोचेदहं विभुरनादिरनीह ईशो,
विश्वात्मधीरिति तमः(फ्) प्रकृतिः(स्) सदैव ॥ 17॥

विद्या त्वमेव ननु बुद्धिमतां(न्) नराणां,
शक्तिस्त्वमेव किल शक्तिमतां सदैव ।
त्वं(ङ्) कीर्तिकान्तिकमलामलतुष्टिरूपा,
मुक्तिप्रदा विरतिरेव मनुष्यलोके ॥ 18॥

गायत्र्यसि प्रथमवेदकला त्वमेव,
स्वाहा स्वधा भगवती सगुणार्धमात्रा ।
आम्नाय एव विहितो निगमो भवत्या,
सञ्जीवनाय सततं सुरपूर्वजानाम् ॥ 19॥

मोक्षार्थमेव रचयस्यखिलं(म्) प्रपञ्चं(न्),
तेषां(ङ्) गताः(ख्) खलु यतो ननु जीवभावम् ।
अंशा अनादिनिधनस्य किलानघस्य ,
पूर्णार्णवस्य वितता हि यथा तरङ्गाः ॥ 20॥

जीवो यदा तु परिवेत्ति तवैव कृत्यं(न्),
त्वं संहरस्यखिलमेतदिति प्रसिद्धम् ।
नाट्यं(न्) नटेन रचितं वितथेऽन्तरङ्गे ,
कार्ये कृते विरमसे प्रथितप्रभावा ॥ 21॥

त्राता त्वमेव मम मोहमयाद्भवाब्धेस्-
त्वामम्बिके सततमेमि महार्तिदे च ।
रागादिभिर्विरचिते वितथे किलान्ते,
मामेव पाहि बहुदुःखकरे च काले ॥ 22॥

नमो देवि महाविद्ये , नमामि चरणौ तव ।
सदा ज्ञानप्रकाशं मे, देहि सर्वार्थदे शिवे ॥ 23॥

इति श्रीमद्देवीभागवतमहापुराणे तृतीयस्कन्धान्तर्गतम्
चतुर्थोऽध्याये विष्णुनाकृतं(न्) देवीस्तोत्रं सम्पूर्णम् ।

